(दी० ५ । प० ८ । मा० ४ ) ४ (बी । १४५)

८८।१। वसिष्ठ शफौ द्वौ । वसिष्ठस्त्रिष्टुप्सोम धातृविष्णवः॥

हाउप्राथा:॥ चयस्यसप्रथः। चनाऽ२। माऽ३उवाऽ३। ईहा।(त्रिः)। हुवाइ। ओऽ२३४वा। ईऽ२३४डा। आनुष्टुभस्यहविषः। हवाऽ२इः। याऽ३उवाऽ३। ईहा।(त्रिः)। हुवाइ। ओऽ२३४वा। ईऽ२३४डा॥ धातुर्द्युतानात्सवितुः। चवाऽ२इ। ष्णाऽ३उवाऽ३। ईहा।(त्रिः)। हुवाइ। ओऽ२३४वा। ईऽ२३४डा॥ रथन्तरमाजभारा। वसाऽ२इ। ष्ठाऽ३उवाऽ३। ईहा।(त्रिः)। हुवाइ। ओऽ२३४वा। ईऽ२३४डा॥ एऽ३। द्युत्॥

(दी° ३१ । प° ३९ । मा° १८ ) ५ (द्यै । १४६)

८८।२।

प्राथा:॥ चयस्यसप्रथः। चनाऽ२। माऽ३१उवाऽ२३। ईडा।(त्रिः)। होइ। हो। वाहाऽ३१उवाऽ२३। ईऽ२३४हा। आनुष्टुभस्यहविषः। हवाऽ२इः। याऽ३१उवाऽ२३। ईडा।(त्रिः)। होइ। हो। वाहाऽ३१उवाऽ२३। ईऽ२३४हा॥ धातुर्द्युतानात्सवितुः। चवाऽ२इ। ष्णाऽ३१उवाऽ२३। ईडा।(त्रिः)। होइ। हो। वाहाऽ३१उवाऽ२३। ईऽ२३४हा॥

रथन्तरमाजभारा। वसाऽ२इ। ष्ठाऽ३१उवाऽ२३। ईडा।(त्रिः)। होइ। हो। वाहाऽ३१उवाऽ२३। ईऽ२३४हा। एऽ३॥ द्युताऽ२३४५:॥

(दी° ३५ । प° ४३ । मा° २१ ) ६ (ब । १४७)

८९।१। शुक्रचन्द्रे द्वे, शुक्रसाम॥ प्रजापतिर्गायत्री वायुः॥

हाउहाउहाउ। शुक्रम्।(त्रिः)। शुक्२शुक्रम्।(त्रिः)। शुक्२शूक्रम्। (त्रिः)।
नियुत्वान्वायऽ३वागाऽ१हीऽ२॥ अय२शुक्रोअऽ३यामाऽ१इताऽ२इ॥
गन्तासिसुन्वऽ३तोगृऽ१हाऽ२३म्॥ हाउहाउहाउ। शुक्रम्।(त्रिः)। शुक्र२शुक्रम्।(त्रिः)।
शुक्र२शूक्रम्।(द्विः)। शुक्रम्। शूऽ२। क्राऽ२३४। औहोवा॥ ए॥ शुक्रम्॥(द्वे त्रिः)॥

(दी° १५ । प° ३२ । मा° ३१ ) ७ (फ । १४८)

९०।१। चन्द्रसाम । प्रजापतिर्गायत्रीत्वष्टाचन्द्रः॥

हाउहाउहाउ। चन्द्रम्।(त्रिः)। चन्द्रश्चन्द्रम्।(त्रिः)। चन्द्रश्चान्द्रम्। (त्रिः)।
अत्राहगोरऽ३मान्वाऽ१ताऽ२॥ नामत्वष्टुरऽ३पाइचाऽ१याऽ२म्।
इत्थाचन्द्रमऽ३सोगृऽ१हाऽ२३इ॥ हाउहाउहाउ। चन्द्रम्।(त्रिः)। चन्द्रश्चन्द्रम्। (त्रिः)।
चन्द्रश्चान्द्रम्।(द्विः)। चन्द्रम्। चाऽ२। द्राऽ२३४। औहोवा॥ ए। चन्द्रम्॥(द्वे त्रिः)॥

(दी° १५ । प° ३२ । मा° ३० ) ८ (फौ । १४९)

॥ अष्टौ षष्ठः खण्डः ॥ ६ ॥

## ॥ अथ सप्तमः खण्डः ॥

९१।१। वायोः स्वरसामानि षट् । वायुरनुष्टुबिन्द्रः॥

एयज्ञायथाः॥ अपूर्विया। हाउ। मघवन्वृ। हाउ। त्रहत्याया। हाउ। तत्पृथिवीम्।
हाउ। अप्रथयाः। हाउ। एऔहोवादिशा:॥ तदस्तभ्नाः। हाउ॥ उतोदिवाम्। हाउ।
एऔहोवाऽ३॥ अस्(स्थि)पयाऽ२३४५:॥

(दी० १२ । प० १८ । मा० १७ ) ९ (जे । १५०)

९१।२। द्वितीयं स्वरसाम॥

एहाउयज्ञायथाः॥ अपूर्विया। होइ।(त्रिः)। हाउहाउहाउ। मघवन्वृ। होइ।(त्रिः)। हाउहाउहाउ॥
त्रहत्याया। होइ।(त्रिः)। हाउहाउहाउ। तत्पृथिवीम्। होइ।(त्रिः)।
हाउहाउहाउ। अप्रथयाः। होइ।(त्रिः)। हाउहाउहाउ। एऔहोवादीशा:॥ तदस्तभ्नाः।
होइ।(त्रिः)। हाउहाउहाउ॥ उतोदिवाम्। होइ।(त्रिः)। हाउहाउहाउ। एऔहोवाऽ३॥
हस्(स्थि)पयाऽ२३४५:॥

(दी० १३। प० ३९ । मा० ५३ ) १० (ढि । १५१)

९१।३। तृतीयं स्वरसाम॥

एहाउ। औहोऽ२। यज्ञायथाऽ३ः। अपूर्विया॥ होववाऽ२३होइ। मा। घवन्वृत्रहत्याया। होववाऽ२३होइ। तात्। पृथिवीमप्राथयाः। होववाऽ२३होइ। एऔहोवादीशा:॥ होववाऽ२३होइ। तात्। अस्तभ्नाउतोदिवाम्। होववाऽ२३होइ। एऔहोवाऽ३॥ हस्(स्थि)इडापयाऽ२३४५:॥

(दी॰ १७ । प॰ १८ । मा॰ १७ ) ११ (जे । १५२)

९१।४। चतुर्थं स्वरसाम॥

याज्ञायाज्ञा॥ यथाअपूर्वियाऔऽ३हो। हाऽ२इया। औऽ३हो। माघवन्वृत्रहत्यायाऔऽ३हो। हाऽ२इया। औऽ३हो॥ तात्पृथिवीमप्राथया औऽ३हो। हाऽ२इया। औऽ३हो॥ तादस्तभ्नाउतोदिवामौऽ३हो। हाऽ२इया। औऽ३होवाहाउवाऽ३। एऽ३। पयाऽ२३४५:॥

(दी॰ ८ । प॰ १५ । मा॰ ११ ) १२ (ण । १५३)

९१।५। पञ्चमं स्वरसाम॥

हुवौहोऽ१इ।(त्रिः)। यज्ञायथा:। अपूर्विया॥ मघवन्वृ। त्रहत्याया॥ तत्पृथिवीम्। अप्राथया:॥ तदस्तभ्ना:। उतोदिवाम्॥ हुवौहोऽ१इ।(द्विः)। हुवौहोऽ१२। उहुवाऽ३हाउ। वाऽ३॥ हस्॥

(दी॰ ७ । प॰ १७ । मा॰ १२ ) १३ (छू । १५४)

९२।१। षष्ठं स्वरसाम॥

योरयिंवोराऽ३यिन्तमाः॥ योद्युम्नाऽ२३४इर्द्यू। म्नावत्तमाऽ२३ः। सोमास्सूऽ२३४ताः। साइन्द्रतायेऽ३॥ अस्तिस्वाऽ२३४धा॥ पतेऽ३। माऽ२३४दाः। उहुवाऽ६हाउ। वा॥ अस्॥

(दी॰ ४ । प॰ ११ । मा॰ ८ ) १४ (तै । १५५)

१। विष्णोस्त्रीणि स्वरीयांसि, पश्चानुगानम् । पश्चानां वायुरनुष्टुबिन्द्रः॥

हाउहोहाइ।(त्रिः)। अन्तरिक्ष॰सुवर्द्दिवंजग। न्मा।(द्वे त्रिः)। परात्पर मैरय। ता।(द्वे-द्विः)।परात्परमैरय। त। औहोवाहाउ। वा॥ ए। यज्ञोदिवोमूर्द्धादिवमादनोघर्मो

(दी॰ २४। प॰ १९ । मा॰ ८ ) १५ (धे । १५६)

२। हाउहोहाइ।(त्रिः)। अन्तरिक्॰॰सुवर्द्दिवंजग। न्मा।(द्वे त्रिः)।

परात्परमैरय। ता।(द्वे द्विः)। परात्परमैरय। त। औहोवाहाउ। वा। ए।
पृथिव्यन्तरिक्षन्द्यौरापॅ॰कनिक्रदात्सिन्धुरापोमरुतोमादयन्तांघर्मोज्योतिः॥

(दी॰ २५ । प॰ १९ । मा॰ ८ ) १६ (भै । १५७)

३।

हाउहोहाइ।(त्रिः)। अन्तरिक्षँ॒सुवर्द्दिवंजग। न्मा।(द्वे त्रिः)। परात्परमैरय। ता।(द्वे-त्रिः)। दिवोमूर्द्धान॒समैरयन्। होयेऽ३। होऽ२३४वा॥ यशोघर्मोज्योतिः। यशस्समैरयन्। होयेऽ३। होऽ२३४वा॥ तेजोघर्मोज्योतिः। तेजस्समैरयन्। होयेऽ३। होऽ२३४वा॥ सुवर्घर्मोज्योतिः। सुवस्समैरयन्। होयेऽ३। होऽ२३४वा॥ ज्योतिर्घर्मोज्योतिः। ज्योतिस्समैरयन्। होयेऽ३। होऽ२३४५वाऽ६५६॥ घर्म्मोघर्म्मोज्योतिः॥

(दी० ३६ । प० ३५ । मा० १६ ) १७ (ङ् । १५८)

९३।१।

हाउहोहाइ।(त्रिः)। अन्तरिक्ष॒सुवर्द्दिवंजग। न्मा।(द्वे-त्रिः)। परात्परमैरय। ता।(द्वे-द्विः)। परात्परमैरय। त। औहोवाहाउ। वा॥ ए। इडांयच्छहस्कृतिंयच्छ। ए। मनओजोयच्छ। ए। मनोमहिमानंयच्छ। ए। यशस्स्त्विषिंयच्छ। ए। प्रजांवर्च्चोयच्छ। ए। पशून्विशंयच्छ। ए। ब्रह्म क्षत्रंयच्छ। ए। स्वर्ज्योतिर्यच्छ॥

(दी० ३१ । प० ३३ । मा० ८) १८ (गै । १५९)

९३।२।

हाउहोहाइ।(त्रिः)। अन्तरिक्षं॰सुवर्द्दिवंजग। न्मा।(द्वे त्रिः)। परात्पर मैरय। ता।(द्वे-
त्रिः)। यज्ञायथाअपूर्व्याया॥ मघवन्वृत्रहत्याया॥ तत्पृथिवीमप्राथायाः॥ तदस्तभ्नउतोदाइवाम्।
हाउहोहाइ । (त्रिः) । अन्तरिक्षं॰सुवर्द्दिवंजग । न्मा (द्वे त्रिः) । परत्परमैरय ।
ता। (द्वे द्विः) । परत्परमैरय । त । औहोवाहाउ । वा ॥ ए।
तेर्जोघर्मः संक्रीडन्तेशिशुमतोर्वायुगोपास्तेजस्वतीर्म्मरुद्भिर्भुवनानिचक्रदुः ।
इट्स्थिइडाऽ२३४५। ईऽ२३४५ ॥

(दी० ४५ । प० ४० । मा० २० ) १९ (म्रौ । १६०)

९३।३। द्व्यनुगानम्॥ विष्णुः वायुरनुष्टुबिन्द्रः॥

हाउहोवा।(त्रिः)। परात्परमैरय। ता।(द्वे द्विः)। परात्परमैरय। त। औहोवाहाउ।
वा॥ इन्द्रोधेनुः।(त्रिः)। आपोधेनुः।(त्रिः)। भूमिर्धेनुः।(त्रिः)। अन्तरिक्षन्धेनु।(त्रिः)।
द्यौर्धेनुः।(त्रिः)। परन्धेनु।(त्रिः)। व्रतन्धेनु।(त्रिः)। सत्यन्धेनु।(त्रिः)। ऋतंधेनु।(त्रिः)।
इडाधेनुः।(त्रिः)। स्वर्धेनुः।(त्रिः)। ज्योतिर्धेनुः॥(त्रिः)॥

(दी० ७१ । प० ४७ । मा० २५ ) २० (खु । १६१)

९३।४।

हाउहोवा।(त्रिः)। परात्परमैरय। ता।(द्वे त्रिः)। यज्ञायथाः। अपूर्विया। अपूर्वियाऽ३।

आपूर्वाऽ२३४या॥ मघवन्वृ। त्रहत्याया। त्रहत्यायाऽ३। त्राहत्याऽ२३४या। तत्पृथिवीम्।

अप्राथयाः। अप्राथयाऽ३ः। आप्राथाऽ२३४याः॥ तदस्तभ्नाः। उतोदिवाम्। उतोदिवाऽ३म्।

ऊतोदाऽ२३४इवाम्। हाउहोवा।(त्रिः)। परात्परमैरय। ता।(द्वे द्विः)। परात्परमैरय।

त। औहोवाहाउ। वा॥ ए। तेजोघर्मस्संक्रीडन्तेवायुगोपास्तेजस्वतीर्मरुद्भिर्भुवनानिचक्रदुः॥

(दी० ४७ । प० ३८ । मा० १८ ) २१ (जै । १६२)

१। चतुरनुगानम् । विष्णुः वायुरनुष्टुबिन्द्रः॥

हाऽ२ऊवाक्।(त्रिः)। होवा।(द्विः)। होवाऽ३। हाउवा। ए।

तोकंप्रजाङ्गभोनायमदध्मह्याचपराचपथिभिश्चरन्ताऽ२३४५ ॥

(दी० ७ । प० ९ । मा० ८ ) २२ (झैं । १६३)

१।

हाऽ२ऊवाक्।(त्रिः)। होवा।(त्रिः)। अय॰सशिङ्क्ेऽ३। होइ।
यस्माद्यावापृथिवीभुवनानिचक्रदुः। होइ। अय॰सशिङ्क्ेऽ३। होइ।
यस्मादापओषधयोभुवनानिचक्रदुः। होइ॥ अय॰सशिङ्क्ेऽ३। होइ।
यस्मात्समुद्रियाभुवनानिचक्रदुः। होइ। अय॰सशिङ्क्ेऽ३। होइ।
यस्माद्विश्वाभूताभुवनानिचक्रदुः। होइ। हाऽ२ऊवाक्।(त्रिः)। होवा।(द्विः)।
होवाऽ३। हाउवा॥ ए। आपः। आपः। आपाऽ२३४५ः॥

(दी° १९ । प° ३३ । मा° २९ ) २३ (दो । १६४)

२।

हाऽ२ऊवाक्।(त्रिः)। होवा।(त्रिः)। येभिर्विया। श्वमैरायाऽ२ः॥ तेभिर्विया।
श्वहीमादाऽ२म्॥ येभिर्भूताम्। सहस्साहाऽ२ः॥ तेभिस्तेजआपः। आपाऽ२।
येभिर्व्यन्तरिक्षमैरयाऽ३ः। हाउवा॥ ए। आपः। आपः। आपाऽ२३४५ः॥

(दी° १३ । प° २० । मा° १७ ) २४ (णे । १६५)

१।

हाऽ२ऊवाक्।(त्रिः)। होवा।(त्रिः)। यज्ञायथाअपूहोऽ२। वायाऽ२। मघवन्वृत्रहाहोऽ२। त्यायाऽ२॥ तत्पृथिवीमप्राहोऽ२। थायाऽ२:॥ तदस्तभ्नाउतोहोऽ२इ। दाइवाऽ२म्। हाऽ२ऊवाक्।(त्रिः)। होवा।(द्विः)। होवाऽ३। हाउवा॥ ए। तेजोघर्मस्संक्रीडन्तेशिशुमतीर्वायुगोपास्तेजस्वतीर्मरुद्भिर्भुवनानिचक्रदूऽ२३४५:॥

(दी॰ १६ । प॰ २३ । मा॰ २० ) २५ (गौ । १६६)

॥ द्वन्द्वपर्वाणि ७७ सामानि ॥

॥ सप्तमः खण्डः ॥ ७ ॥

॥ इति (ग्रामे) आरण्यकगाने तृतीयः प्रपाठकः ॥ ३ ॥

॥ इति द्वन्द्व-नाम द्वितीयं पर्व समाप्तम् ॥

---

## ॥ अथ आरण्यकगाने (वाचो-) व्रतपर्व ॥

## ॥ अथ चतुर्थप्रपाठके प्रथमोऽर्द्धः ॥

### ॥ अथ प्रथमः खण्डः॥

१। वाचो व्रते द्वे । वाग्यजुर्वाक् वाक् त्रिष्टुप् वाक्॥

ओम्॥ हुवेवाचाम्॥ वाचंवाच२हुवेऽ२। वाक्श्रृणोतुश्रृणोतुवाऽ२क्। वाक्समैतुसमैतुवाऽ२क्॥
वाग्रमताम्। रमताम्। रमाऽ२३। तुवाऽ३४औहोवा॥ ईहा।(त्रिः)॥

(दी॰ २१ । प॰ ११ । मा॰ ६ ) १ (कू । १६७)

२।

हुवाइवाचाम्। वाच२हुवाइ॥ वाक्श्रृणोतूऽ२३। शाऽ३र्णोतुवाक्। वाक्समैतूऽ२३।
साऽ३मैतुवाक्॥ वाग्रमताऽ२३म्॥ रम। तुवाऽ३४औहोवा॥ माऽ२३४५इ॥(त्रिः)॥

(दी॰ १३ । प॰ १२ । मा॰ १० ) २ (ठौ । १६८)

९४।१। शशस्य कर्षूशवस्य व्रतम् कर्षूसाम । शशो गायत्रीन्द्रो वृत्रहा॥

२३र ४ ५ १ २र १ २ १२र १ २ १२र १ २ ३ २
आतूनाऽ२३इन्द्रवृत्रहन्हाउ॥ आस्माकमाहाउ। धामागहाहाउ॥ माहान्महाहाउ॥ भिरूऽ३।
१ ५ ५ १ र
ताऽ२३४इभाइ। उहुवाऽ६हाउ। वा॥ अस् (स्थि)फट्(स्थि)मृस्(स्थि)हस्(स्थि)वाक्।
३ १ १ १
ऊऽ२३४५॥

(दी॰ ६ । प॰ १० । मा॰ १३ ) ३ (ङिं । १६९)

❀॥ अनयोर्मूलं न ऋक्, अपि तु स्तोभः स चैषः स्तो॰ प्॰ १-२

३ २ २र ३२र ३ २ ३ १ २ ३ १ २
हुवे । वाचम् । वाचम् । हुवे । वाक् । शृणोतु । शृणोतु । वाक् । वाक्

३ १ २ ३ १ २ २र ३२र ३
समैतु । समैतु । वाक् । वाक् । र१मताम् । रमतु । वाक् । मे ।

१। सत्रस्यर्द्धि साम । प्रजापतिस्त्रिष्टुबिन्द्रः॥

२र र र र र र र ^ २ १ २ १र २ १ २ १र २ १ र २ र
औहोवाऔहोवाऔहोऽ३वा। अगन्मज्योतिः।(द्विः)। अगन्मज्योतिः। अमृताअभूम।(द्विः)।
१ र २ र र १ २ १र र २र र १ २ १र र २र
अमृताअभूमा। तरिक्षंपृथिव्याअध्यारुहामा।(द्विः)। तरिक्षंपृथिव्याअध्यारुहाम।
१ २ १ २र १ र २र १ २र र १ र २३र २
दिवमन्तरिक्षादध्यारुहाम।(त्रिः)। अविदा मदेवान्।(त्रिः)। समुदेवैरगन्महि।(त्रिः)।
र र र र र र र ^ २ १ र ३ १ १ १
औहोवाऔहोवाऔहोऽ३वा॥ सुवर्ज्योतीऽ२३४५:॥

(दी॰ ६० । प॰ २१ । मा॰ १७ ) ४ (पे । १७०)

❁ अस्य मूलं न ऋक् । अपि तु स्तोभः स च्चैषः - स्तो० प० २,२

१२र १२र २ १ २ ३ १२र ३ १ २ ३ २ १ २ ३
अगन्म। ज्योति । अमृताः । अ । मृताः । अभूम । अन्तरिक्षम् । पृथिव्याः। अधि । आ । आरुहाम ।

१२र ३ १ २ १२र २ १२र ३ २ २ ३
दिवम् । अन्तरिक्षात् । अधि । आ । अरुहाम । अविदाम । दवान् । सम् । देवैः । अगन्महि ॥ २ ॥

९५।१। प्रजापतेः प्रतिष्ठा साम । प्रजापतिः गायत्र्यग्निः॥

२ र १ र २ १ र २ १ र २ १२र र १
इममूषू॥ त्वमस्मा। काम्। सनिंगायत्रंनव्या॰सम्॥ आग्नेदेवाइ॥
२ १ ^ ३ ५र र ३ १ १ १
षुप्राऽ२वोऽ२३४औहोवा॥ चाऽ२३४५:॥

(दी० ८ । प० ७ । मा० ५ ) ५ (ठु । १७१)

१। व्याहृति । प्रजापयिर्यजुरग्निस्त्रिष्टुबग्निः॥

२र र र र र र ३ ५र र २^ २र१र १ १ १
हाउहाउहाउ। एवाहियेवाऽ२३४औहोवा। एऽ३। भूतायाऽ२३४५॥ भी॥१॥
२र र र र र र ३ ५र र २^ २र१र १ १ १
हाउहाउहाउ। एवाहियेवाऽ२३४औहोवा। एऽ३। रूपायाऽ२३४५॥ भी॥२॥
२र र र र र र ३ ५र र २^ १र ३ १ १ १
हाउहाउहाउ। एवाहियेवाऽ२३४औहोवा। एऽ३। आयुषेऽ२३४५॥ धी॥३॥
२र र र र र र ३ ५र र २^ १र ३ १ १ १
हाउहाउहाउ। एवाहियेवाऽ२३४औहोवा। एऽ३। ज्योतिषेऽ२३४५॥ धी॥४॥

(दी० ३८ । प० १६ । मा० १६ ) ६ (टू । १७२)

❁ अस्य मूलं न ऋक्, अपि तु स्तोभः, स च्चैषः – स्तो० प० २-२

३ २ ३ २ १ २ ३ १ २ १२र १२र
एष । हि । एव । भूताय । रूपाय। आयुषे । ज्योतिषे ॥

९६।१। परमेष्ठिनः प्राजापत्यस्य व्रतम् । परमेष्ठ्यनुष्टुप् परमेष्ठी॥

हाउहाउहाउ। आनोऽ२ब्रुवाइ।(द्विः)। आनोऽ२ब्रुवाऽ२। याऽ२३४औहोवा।

रक्षतनोरक्षितारा२३४५:। हाउहाउहाउ। आनोऽ२ब्रुवाइ।(द्विः)। आनोऽ२ब्रुवाऽ२।

याऽ२३४औहोवा। गोपायतगोपायितारा२३४५:। हाउ हाउहाउ। आनोऽ२ब्रुवाइ।(द्विः)।

आनोऽ२ब्रुवाऽ२। याऽ२३४औहोवा। मयिवर्च्चः। अथोयाऽ१शाऽ२:॥ अथोयज्ञ।

स्ययात्पाऽ१याऽ२:॥ परमेष्ठी। प्रजापाऽ१तीऽ२:॥ दिविद्यामि। वदृ२हाऽ१तूऽ२३।

हाउहाउहाउ। आनोऽ२ब्रुवाइ।(द्विः)। आनोऽ२ब्रुवाऽ२। याऽ२३४औहोवा।

रक्षतनोरक्षितारा२३४५:। हाउहाउहाउ। आनोऽ२ब्रुवाइ।(द्विः)। आनोऽ२ब्रुवाऽ२।

याऽ२३४औहोवा। गोपायतगोपायितारा२३४५:। हाउहाउहाउ। आनोऽ२ब्रुवाइ।(द्विः)।

आनोऽ२ब्रुवाऽ२। याऽ२३४औहोवा॥ ए। रक्षतनोरक्षितारोगोपायत गोपायितारः।(द्वे-

द्विः)। ए। रक्षतनोरक्षितारोगोपायतगोपायितारा२३४५:॥

(दी॰ ७५ । प॰ ४८ । मा॰ ४७ ) ७ (बे । १७३)

१। परमेष्ठिनः प्राजापत्यस्य व्रतम् । (कृष्ण व्रतम्)। अंगिरास्त्रिष्टुप्सोमः॥

सोमासोऽ३मा।(त्रिः)। यत्रचक्षुः। तदाभाऽ१राऽ२॥ यत्रश्रोत्रम्। तदा भाऽ१राऽ२॥

यत्रआयुः। तदाभाऽ१राऽ२॥ यत्ररूपम्। तदाभाऽ१राऽ२॥ यत्रवर्च्चः। तदाभाऽ१राऽ२॥

यत्रतेजः। तदाभाऽ१राऽ२॥ यत्रज्योतिः। तदाभाऽ१राऽ२॥ सोमासोऽ३मा।(द्विः)।

सोमाराऽ३जाऽ३न्। होऽ२हाऽ२३४औहोवा। इट्(स्थि)इडाऽ२३४५॥

(दी॰ १३ । प॰ २१ । मा॰ ११ ) ८ (ठ । १७४)

❀ ॥ अस्य मूलं न ऋक् अपि तु स्तोभः, स चैषः - स्तो॰ प॰ २.२

सोमसोम । सोम । सोम । यत्र । चक्षुः । तत् । आ । यत्र । श्रोत्रम् ।

तत् । आ । भर । यत्र । आयुः । आ । भर । यत्र । रूपम् । तत् ।

आ । भर । यत्र । वर्च्चः । तत् । आ । यत्र । तेजः । तत् । आ । भर ।

यत्र । ज्योथिः । तत् । आ । भर । सोम । राजन् ॥

९७।१। सोम व्रतम् । सोमस्त्रिष्टुप्सोमः॥

ओवाऽ२।(त्रिः)। सन्तेपया। सीऽ३समु। यन्तुवाजाः॥ संवृष्णिया। नीऽ३अभि। मातिषाहाः॥ आप्यायमा। नोऽ३अमृ। तायसोमा॥ दिविश्रवा। सीऽ३उत्त। मानिधिष्वा॥ ओवाऽ२।(द्विः)। ओऽ२। वाऽ२३४। औहोवा॥ प्र्य (त्रिर्गसेत् )॥ ३ ॥

(दी॰ १६ । प॰ २३ । मा॰ ५ ) ९ (गु । १७५)

९९।१। सोम व्रतम् । सोमो विराट् सोमः॥

२र   र   र          ^            २र        २                   २र   ^                र    २  १ १ १
हाउहाउहाउ। हौवाऽ३।(त्रिः)। हाह। हौवाऽ३।(द्वे त्रिः)। होवाऽ३।(त्रिः)। होऽ३वाऽ३४५।

र      २      ५र र      १     र  र  २र   र     १ २र      १ २१र    २       १  र
(द्विः) । होऽ३वा३४ । औहोव । त्वमिमाओषधीःसोमविश्वाः । त्वमपोअजनयस्त्वंगाः।

र  २र   १      २          १  र  २र १  र २        २र   र   र         ^
त्वमातनोरुर्वन्तरिक्षम् । त्वंज्योतिषावितमेववर्थ । हाउहाउहाउ। हौवाऽ३।(त्रिः)।

२र        २                  २र  र           २र
हाह। हौवाऽ३।(द्वे त्रिः)। होवावा ३।(त्रिः)। ए ।

१        २  १    २     १र  २  १  र  २    १ र२र     र         १         १ १ १
जनदिवमन्तरिक्षंपृथिवीविश्वभोजसंपुरुरूपाअजीजनः । इट्स्थिइडाऽ२३४५ ॥

(दी० ४० । प० ४१ । मा० १४ ) १० (पी । १७६)

॥ दश प्रथमः खण्डः ॥ १ ॥

॥ अथ द्वितीयः खण्डः ॥

९९।१। भारद्वाजस्य व्रतम् । भरद्वाजस्त्रिष्टुबिन्द्रः॥

२र   र   र       १   २          १    २ १र र      २ १      २ ३ ४र  ५      २  १
हाउहाउहाउ। वाग्ददद। ददाऽ२या। इन्द्रोराजा। जगतः। चर्षणीनाम्॥ अधिक्षमा।

२  १  र     २ ३ ४    ५      २१र       २^  १र       २   ३   ४र  ५      २र १  र       २ १
विश्वरू। पंयदस्या॥ ततोददा। तीऽ३दाशु। षाइव सूनी॥ चोदद्राधाः। उपस्तु।

२  ३ ४  ५      २र    र    र       १    २              न          २             १ १ १
तंचिदर्वाक्। हाउहाउहाउ। वाग्ददद। ददाऽ२याऽ३। हाउवाऽ३॥ ईऽ२३४५॥

(दी० १५ । प० २० । मा० १२ ) ११ (म्रा । १७७)

१००।१। भरद्वाजिनां व्रतम् । भरद्वाजोऽनुष्टुप्सोमेन्द्रौ॥

हाउहाउहाउ। वाजऽ२म्।(द्विः)। वाजम्। एऽ२। वाजऽ२म्।(त्रिः)। वाजम्। एऽ२।
वाजऽ२म्।(त्रिः)। वाजम्। एऽ२। वाजऽ२म्। वाजमोऽ२इ।(द्वे त्रिः)। वाजम्।
विवीऽ२विवि।(त्रिः)। विविहोऽ२इविवि।(त्रिः)। व्यश्नवाइवि।(त्रिः)। अभीनवन्तआऽ२द्रूहाऽ२ः।
द्रुहोद्रुहः।(त्रिः)। प्रियमिन्द्र स्यकाऽ२मायाऽ२म्। मियंमियम्।(त्रिः)। वत्सन्नपूर्वआऽ२यूनीऽ२।
युनीयुनि।(त्रिः)। जातꣳरिहन्तिमाऽ२ताराऽ२ः। तरोतरः।(त्रिः)। हाउहाउहाउ। वाजऽ२म्।(द्विः)।
वाजम्। एऽ२। वाजऽ२म्।(त्रिः)। वाजम्। एऽ२। वाजऽ२म्।(त्रिः)। वाजम्। एऽ२।
वाजऽ२म्। वाजमोऽ२इ।(द्वे त्रिः)। वाजम्। विवीऽ२विवि।(त्रिः)। विविहोऽ२इविवि।(त्रिः)।
व्यश्नवाइवि।(द्विः)। व्याऽ२३श्नवाउ। वा। ए। सुधामधाम।(द्वे द्विः)। ए। सुधामधामाऽ२३४५॥

(दी० ६३ । प० ८५ । मा० ६८ ) १२ (णे । १७८)

१०१।१। यम व्रते द्वे (यम व्रतम्)। यमो गायत्र्यग्निः॥

मनोहाउ। वयोहाउ। वर्चोहाउ। अग्निम्। ईडाऽ२इ। पुरोहाऽ२३४इताम्॥ इहहाउ।
इडाहाउ। आयुर्हाउ। यज्ञ। स्यदाऽ२इ। वमृत्वीऽ२३४ जाम्॥ स्वर्हाउ। ज्योतिर्हाउ।
ऋतꣳहाउ। होता। रꣳराऽ२३॥ त्वधाऽ३ताऽ५माऽ६५६म्॥ एऽ३। महाऽ२३४५:॥

(दी० १८ । प० २० । मा० १७ ) १३ (णे । १७९)

१०२।१। अङ्गिरसां व्रतम्॥ अङ्गिरसस्त्रिष्टुबिन्द्रः॥

हाउहाउहाउ। हाऽ३। ओंऽ२३४वाक्।(द्वे त्रिः)। ओम्।(त्रिः)। ओम्। (त्रिः)। हाऽ३।
ओंऽ२३४वाक्।(द्वे त्रिः)। एआयुः।(त्रिः)। आयुः।(त्रिः)। इन्द्रन्नरोनेमधिताहवाऽ२न्ताइ॥
यत्पार्यायुनजतेधियाऽ२स्ताः॥ शूरोनृषाताश्रवसश्चकाऽ२माइ॥ आगोमतिव्रजेभजातुवाऽ२न्नाः।
हाउहाउहाउ। हाऽ३। ओंऽ२३४वाक्।(द्वे-त्रिः)। ओम्।(त्रिः)। ओम्।(त्रिः)। हाऽ३।
ओंऽ२३४ वाक्।(द्वे त्रिः)। एआयुः।(त्रिः)। आयुः।(द्विः)। आयूऽ३४। औहोवा॥ ए।
आयुर्द्धाअस्मभ्यंवर्च्चोधादेवेभ्याऽ२३४५ः॥

(दी० ४७ । प० ५७ । मा० ५३ ) १४ (छि । १८०)

१०३।१। अश्विनोर्व्रते द्वे । अश्विनौ बृहत्यश्विनौ॥

होइहाऽ३। इहोइहाऽ३।(द्वे त्रिः)। इमाउवांदिविष्टयाओहाउ॥ उस्राहवन्तेअश्विनाओहाउ॥
अयंवामह्वेवसेशचीवसूओहाउ॥ विशंविशꣳहिगच्छथा ओहाउ। होइहाऽ३। इहोइहाऽ३।(द्वे-
द्विः)। होइहाऽ३। इहोइहाऽ३४। औहोवा॥ ईऽ५हीहीहीहीहि॥

(दी० २८ । प० १८ । मा० २२ ) १५ (डा । १८१)

१०३।२। अश्विनोर्व्रतोत्तरम्॥

होइहा। इहोइहा।(द्वे त्रिः)। इमाउवांदिविष्टयाहोहाउ॥ उस्राहवन्तेअश्विनाहोहाउ॥ अयंवामह्वेवसेशचीवसूहोहाउ॥ विशंविश२हिगच्छथा होहाउ। होइहा। इहोइहा।(द्वे-द्विः)। होइहा। इहोइहा२३४। औहोवा॥ ई२॥(त्रिः)॥

(दी० १४ । प० २० । मा० १८ ) १६ (नै । १८२)

१०४।१। गवां व्रते द्वे । गावस्त्रिष्टुप्गावः॥

हाउहाउहाउ। गावोहाउ।(त्रिः)। वृषभपत्नीर्हाउ।(त्रिः)। वैराजपत्नीर्हाउ। (त्रिः)। विश्वरूपाहाउ। (त्रिः)। अस्मासुरमध्व२हाउ।(त्रिः)। तेमन्वतप्रथमन्नामगो२नाम्॥ त्रिस्सप्तपरमन्नामजा२नान्॥ ताजानतीरभ्यनूषता२क्षाः॥ आविर्भुवन्नरुणीर्यशसागा२वाः। हाउहाउहाउ। गावोहाउ।(त्रिः)। वृषभपत्नीर्हाउ।(त्रिः)। वैराजपत्नीर्हाउ।(त्रिः)। विश्वरूपाहाउ। (त्रिः)। अस्मासुरमध्व२हाउ।(द्विः)। अस्मासुरमध्वा२३२हाउ। वा॥ ए। गावोवृषभपत्नी वैराजपत्नीर्विश्वरूपाअस्मासुरमध्वम्।(द्वे द्विः)। ए। गावोवृषभपत्नीर्वैराजपत्नीर्विश्वरूपाअस्मासुरमध्वा२३४५म्॥

(दी० १२९ । प० ४३ । मा० ४६ ) १७ (दू । १८३)

१०५।१। गवांव्रतोत्तरम्॥

हाउहाउहाउवा। अग्निमीडेपुरोहितम्। देवेषुनिधिमा२अहम्॥ हाउहाउहाउवा। यज्ञस्यदेवमृत्विजम्। देवेषुनिधिमा२अहम्॥ हाउहाउहाउवा। होतार२रत्नधातमम्। देवेषुनिधिमा२अहम्॥ हाउहाउहाउवा॥ ए। देवेषुनिधिमा२अहम्॥(द्वे त्रिः)॥

(दी॰ २८ । प॰ १६ । मा॰ २७ ) १८ (टे । १८४)

१०६।१। कश्यपस्य व्रते द्वे । कश्यपोऽनुष्टुप्सोमः॥

हाउहाउहाउ। प्सुवन्तरा।(त्रिः)। कोज्योतिः। अर्कोज्योतिः। अर्कोज्योतिः। सुवर्धेनूः।(त्रिः)। कश्यपस्यसुऽ३वार्वाऽ१इदाऽ२ः॥ यावाहुस्सयुऽ३जावाऽ१इतीऽ२॥ ययोर्विश्वमऽ३पाइव्राऽ१ताऽ२म्॥ यज्ञन्धीरानिऽ३चाआऽ१याऽ२३। हाउहाउहाउ। प्सुवन्तरा। (त्रिः)। कोज्योतिः। अर्कोज्योतिः। अर्कोज्योतिः। सुवर्धेनूः।(द्विः)। सुवर्द्धेनुः। औहोवाहाउ। वाऽ३॥ इट्(स्थि)इडाऽ२३४५॥

(दी॰ ३७ । प॰ २७ । मा॰ २६ ) १९ (छू । १८५)

१०६।२।

हाउहाउहाउ। ऊऽ२।(त्रिः)। कह्वाऽ२उ।(त्रिः)। कश्यपस्यसुवाऽ२३र्विदाः॥ यावाहुस्सयुऽ३जावाऽ१इतीऽ२॥ ययोर्विश्वमपाऽ२३इव्रताम्॥ यज्ञन्धीरानिऽ३चाआऽ१याऽ२३। हाउहाउहाउ। ऊऽ२।(त्रिः)। कह्वाऽ२उ।(द्विः)। कह्वाऽ२३उ। ह्वाउवाऽ३॥ ईऽ२३४५॥

(दी॰ ११ । प॰ २० । मा॰ १८ ) २० (ङ्रे । १८६)

॥ दश द्वितीयः खण्डः ॥ २ ॥

## ॥ इति (ग्रांमे) आरण्यकगाने चतुर्थस्यार्द्धः प्रपाठकः ॥

## ॥ अथ चतुर्थप्रपाठके द्वितीयोऽर्द्धः ॥

### ॥ अथ तृतीयः खण्डः ॥

१०७।१। अङ्गिरसां व्रते द्वे । अङ्गिरसस्त्रिष्टुबिन्द्रः॥

हाउहाउहाउ। इन्द्राऽ३१२३म्। हाउहाउहाउ। नरोनेमधिताहवान्ताइ। हवान्ताइ। हवान्ताऽ३इ। ओइ। हवन्ताइ। वन्ता। औहोवा। एहिया॥ हाउहाउहाउ। यत्पाऽ३१२३। हाउहाउहाउ। यायुनजतेधियास्ता:। धियास्ता:। धियास्ताऽ३:। ओइ। धियस्ता:। यस्ता। औहोवा। एहिया॥ हाउहाउहाउ। शूरोऽ३१२३। हाउहाउहाउ। नृषाताश्रवसश्चकामाइ। चकामाइ। चकामाऽ३इ। ओइ। चकामाइ। कामा। औहोवा। एहिया॥ हाउहाउहाउ। आगोऽ३१२३। हाउहाउहाउ। मतिव्रजेभजातुवान्नः। तुवान्नः। तुवान्नाऽ३:। ओइ। तुवन्ना:। वन्ना। औहोवा। एहिया। हाउहाउहाउ। वाऽ३॥ ईऽ२३४५॥

(दी॰ ५३। प॰ ४७ । मा॰ ४८ ) १ (द्वै । १८७)

१०८।१।

२र र र १ २ १ २ १ २ १ न २
हाउहाउहाउ। हाहाउ।(त्रिः)। इहाहाउ।(त्रिः)। इयाहाउ।(द्विः)। इयाऽ३हाउ। वा।

१ र२र र र १ २र र १ र र र २ १ २ १
अभित्वाशूरनोनुमोहस्॥ अदुग्धाइवधेनवोहस्। ईशानमस्यजगतस्स्वर्दृशꣳहस्।

र र२ १ र २र १ २ १ २१ २ १ २ १ र २१र २१र २ १
ईशानमिन्द्रतस्थुषोहस्॥ सहस्वान्त्सहसस्पतिरदिद्यवद्धस्॥ स्वर्जिद्वाजसातमोदिद्यवद्धस्।

२र र र १ २ १ २ १ २ १ न २
हाउहाउहाउ। हाहाउ।(त्रिः)। इहाहाउ।(त्रिः)। इयाहाउ । (द्विः) । इयाऽ३हाउ ।

१ र र
वा ॥ इडाहस्स्थिहस्स्थिइडा ॥ (त्रिः) ॥

(दी० २८ । प० ३१ । मा० ३७ ) २ (टे । १८८)

१०९।१। अपां व्रते द्वे । आपो विराडिन्द्रः आपस्त्रिष्टुबापः॥

२र र र १र २ १ र २ र १ र २ र र र
हाउहाउहाउ। ऐरयत्।(त्रिः)। अपस्समैरयत्।(त्रिः)। भूतमैरयत्। (त्रिः)। अपाङ्गर्भोग्निरिडा।

र र र र र र र र १ र २ १ २
पाङ्गर्भोग्निरिडा। पाङ्गर्भोग्निरिडा। पृथिव्यागर्भोग्निरिडा।(त्रिः)। समन्यायन्त्युपयन्तियाऽ२३न्याः॥

र १ र २ १ २ १ र र र २ १ २
समानमूर्वन्नद् स्पृणाऽ२३न्ती॥ तमूशुचिꣳशुचयोदीदिवाऽ२३ꣳसाम्॥

१र र २ १ २^ २र र र १र २ १ र २
अपान्नपातमुपयन्तियाऽ२३पाऽ३ः। हाउहाउहाउ। ऐरयत्।(त्रिः)। अपस्समैरयत्।(त्रिः)।

र १र २ र र र र र र र र र र
भूतमैरयत्।(त्रिः)। अपाङ्गर्भोग्निरिडा। पाङ्गर्भोग्निरिडा। पाङ्गर्भोग्निरिडा। पृथिव्यागर्भोग्निरिडा।

र र २ र १ २ १ २र १ २ १ २र
(द्विः)।पृथिव्यागर्भोग्निरिडाऽ३। हाउवा॥ ए। अग्निश्शिशुक्रः। ए। शुक्रश्शिशुक्रः। ए।

१र २ १ २ १ २र १र २१र र २र र १र २१२र१२र१ २र १ र ३ १११
तेजश्शक्रस्यशक्रम्। ए। तेजस्सप्रास्समीचीः। ए। तेजउषोनजारः। ए। सुवज्योर्तीऽ२३४५ः॥

(दी॰ ८८ । प॰ ४९ । मा॰ ३५ ) ३ (ढु । १८९)

१०९।२।

२र र र १र २ १र२ १ २
हाउहाउहाउ। ऐरयन्।(त्रिः)। समैरयन्।(त्रिः)। समस्वरन्।(त्रिः)।

१ र २ १ २ र१र २ १ २
समन्यायन्त्युपयन्तियाऽ२३न्याः॥ समानमूर्वन्नद्यस्पृणाऽ२३न्ती॥

१र रर२ १ २ १र र २ १ २^ २र र र
तमू शुचि॰शुचयोदीदिवाऽ२३॰साम्॥ अपान्नपातमुपयन्तियाऽ२३पाऽ३ः। हाउहाउहाउ।

१र २ १र२ १ २ १ २ २ १११
ऐरयन्।(त्रिः)। समैरयन्।(त्रिः)। समस्वरन्।(द्विः)। समस्वराऽ३न्। हाउवाऽ३॥ ईऽ२३४५॥

(दी॰ २६ । प॰ २६ । मा॰ २८ ) ४ (कै । १९०)

११०।१। अहोरात्रयोर्व्रते द्वे (अहर्व्रतम्) । अहर्गायत्री सूर्यः॥

२ऽ १र २ र१ र र२ १ रर२ १ र २र र र
हा३ (३) वा । प्रागन्यदनुवर्ततेरजोपागन्यत्तमोपेषतिभ्यसा। हाउहाउहाउ।

र १ २ २र ऽ ऽ
उदुत्यञ्जातऽ३वाइदाऽ१साऽ२३म् । हाउहाउहाउवा ।

१र २ र१ र र२ १ रर२ १ र २र र र
प्रागन्यदनुवर्ततेरजोपागन्यत्तमोपेषतिभ्यसा । हाउहाउहाउ।

र १ २ २र ऽ ऽ १र २ र१ र र२ १ रर२ १ र
देवंवहन्तिऽ३काइताऽ१वाऽ२३ः। हाउहाउहाउ । प्रागन्यदनुवर्ततेरजोपागन्यत्तमोपेषतिभ्यसा।

२र र र र र १ २ २र ऽ ऽ र
हाउहाउहाउ। दृशेविश्वायऽ३सूराऽ१या२३म् । हाउहाउहाउवा ॥ ए ।

१ र १र२र १ र २ १ र२र १२र ३ १११
अरूरुचद्धर्मोअरूरुचदुषसाम्दिविसूर्योविभातीऽ२३४५ ॥

(दी॰ ४२ । प॰ १५ । मा॰ २७ ) ५ (ञे । १९१)

१११।१। रात्रेर्व्रतम् । रात्र्यनुष्टुब्रात्रिः॥

होऽ२इ।(त्रिः)। आप्रागाद्भद्रायुवतिः॥ होऽ२इ।(त्रिः)। अह्न×केतून्त्समीर्त्सति॥
होऽ२इ।(त्रिः)। अभूद्भद्रानिवेशनी॥ होऽ२इ।(त्रिः)। विश् स्यजगतोरात्री॥ होऽ२इ।(द्विः)।
होऽ२। वाऽ३। हाउवाऽ३॥ ईऽ२३४५॥

(दी° १४ । प° २२ । मा° १६ ) ६ (थ्रू । १९२)

११२।१। विष्णोर्व्रतम् । विष्णुर्जगती वैश्वानरः॥

हाउहाउहाउ। ऊऽ२।(द्विः)। ऊऽ२। वाऽ३। हाउवाऽ३। हस्(स्थि)हहस्।
अर्चिश्शोचिस्तपोहरः। प्रक्षस्यवृष्णोअरुषस्यनूमाऽ२३हाः॥ प्रनोवचोविदथाजातवेदाऽ२३साइ॥
वैश्वानरायमतिर्नव्यसेशूऽ२३चीः॥ सोमइवपवतेचारुरग्नाऽ२३याऽ३इ। हाउहाउहाउ।
ऊऽ२।(द्विः)। ऊऽ२। वाऽ३। हाउवाऽ३॥ ईऽ२३४५॥

(दी° २२ । प° १९ । मा° १७ ) ७ (झे । १९३)

११३।१। विश्वेषां देवानां (वैश्वदेव) व्रतम् । विश्वेदेवाद्यावापृथिव्यौ(इन्द्रः) जगती विश्वेदेवाः॥

हाउहाउहाउ। आइही।(त्रिः)। आइहीऽ२।(त्रिः)। आइहिहाऽ२इ।(द्विः)। आइहिहाइ। विश्वेदेवाममश्रृण्वन्तुयाऽ२३ज्ञाम्॥ उभेरोदसीअपान्नपाचमाऽ२३न्मा॥ मावोवचा२ंसिपरिचक्ष्याणिवोऽ२३चाऽ३म्॥ हाउहाउहाउ। आइही।(त्रिः)। आइहीऽ२।(त्रिः)। आइहिहाऽ२इ।(द्विः)। आइहिहाइ। सुम्नेष्विद्वोअन्तमामदाऽ२इमाउवाऽ३॥ ईऽ२३४५॥

(दी० २१ । प० २५ । मा० ३६ ) ८ (ङू । १९४)

११४।१। वसिष्ठ व्रते द्वे । द्वयोर्वसिष्ठस्त्रिष्टुबिन्द्रः॥

हाउहाउहाउ। ऊऽ२।(त्रिः)। षि।(त्रिः)। इयाहाउ।(त्रिः)। उदुब्रह्मा। णीऽ३ऐर। तश्रवस्या॥ इन्द्२ंसमा। यैऽ३मह। यावसिष्ठा॥ आयोविश्वा। नीऽ३श्रव। सातताना॥ उपश्रोता। मईव। तोवचा२ंसी। हाउहाउहाउ। ऊऽ२।(त्रिः)। षि।(त्रिः)। इयाहाउ।(द्विः)। इयाऽ३हाउ। वाऽ३॥ ईऽ२३४५॥

(दी० १६ । प० ३४ । मा० १४ ) ९ (घ्री । १९५)

११४।२।

हाउहाउहाउ। ऊऽ२।(त्रिः)। षि।(त्रिः)। इयो।(त्रिः)। इयोवा।(त्रिः)। इयोवाहाइ।(त्रिः)।
उदुऽ२।(द्विः)। उदु। उदोवा।(त्रिः)। उदोवाहाइ।(त्रिः)। ब्रह्मा। णीऽ३ऐर। तश्रवस्या।
स्या। स्या। स्योवा।(त्रिः)। स्योवाहाइ। (त्रिः)। इन्द्रऽ२म्।(द्विः)। इन्द्रम्। इन्द्रोवा।(त्रिः)।
इन्द्रोवाहाइ।(त्रिः)। समा। येऽ३मह। यावसिष्ठा। ष्ठा। ष्ठा। ष्ठोवा।(त्रिः)। ष्ठोवाहाइ।(त्रिः)।
आयोऽ२।(द्विः)। आयः। आयोवा।(त्रिः)। आयोवाहाइ।(त्रिः)। विश्वा। नीऽ३श्रव।
सातताना। ना। ना। नोवा।(त्रिः)। नोवाहाइ।(त्रिः)। उपऽ२। (द्विः)। उप। उपोवा।(त्रिः)।
उपोवाहाइ।(त्रिः)। श्रोता। मईव। तोवचा२सी। सी। सी। सोवा।(त्रिः)। सोवाहाइ।(त्रिः)।
हाउहाउहाउ। ऊऽ२।(त्रिः)। षि।(त्रिः)। इयो।(त्रिः)। इयोवा।(त्रिः)। इयोवाहाइ।(द्विः)।
इयोवाऽ३हाउ। वाऽ३। ईऽ२३४५॥

(दी० १५६ । प० ११४ । मा० ४२ ) १० (घ्रा । १९६)

॥ दश तृतीयः खण्डः ॥ ३ ॥

## ॥ अथ चतुर्थः खण्डः ॥

११५।१। इन्द्रस्य सञ्जयम् । इन्द्रस्त्रिष्टुबिन्द्रः॥

हाउहाउहाउ। विश्वाधनानिसञ्जित्यवृत्रहाभूर्यासुतिः। होइ।(द्वे त्रिः)। उरुंघोषश्चक्रेलोकम्।
होइ।(द्वे त्रिः)। वृत्रमेभ्योलोकेभ्योनुनुदानः। होइ। (द्वे त्रिः)। इन्द्रन्नरो। नेऽ३मधि।
ताहवन्ताइ॥ यत्पारियाः। युनजा। ताइधियस्ताः॥ शूरोनृषा। ताऽ३श्रव। सश्चकामाइ॥
आगोमताइ। व्रजेभ। जातुवन्नाः। हाउहाउहाउ। विश्वाधनानिसञ्जित्यवृत्रहाभूर्यासुतिः।
होइ।(द्वे त्रिः)। उरुंघोषश्चक्रेलोकम्। होइ।(द्वे त्रिः)। वृत्रमेभ्योलोकेभ्योनुनुदानः।
होइ। (द्वे द्विः)। वृत्रमेभ्योलोकेभ्योनुनुदानः। होऽ२। वाऽ२३४औहोवा॥ ए।
वृत्रंजघन्वा२ अपतद्ववारयत्तमः। (द्वे द्विः)। ए। वृत्रंजघन्वा२ अपतद्ववारयत्तमाऽ२३४५:॥

(दी० ११० । प० ५७ । मा० ५५ ) ११ (फु । १९७)

११६।१। यशस्साम । अगस्त्ययशः ज्योतिष्मतीजगती द्यावापृथिव्यौ॥

हाउहाउहाउवा। यशोमाद्यावापृथिवी॥ हाउ (३) वा। यशोमेन्द्रबृहस्पती॥ हाउ(३)
वा। यशोभगस्यन्दतु ॥ हाउ (३) वा। यशोमाप्रतिमुच्यताम् ॥ हाउ (३) वा।
यशःस्वियस्स्यास्स२सदः ॥ हाउ (३) वा। अहंप्रवदितास्याम् । हाउ (३) वा।
अश्वमिष्टयेऽ३हस् ॥

(दी॰ १५ । प॰ १४ । मा॰ २५ ) १२ (भु । १९८)

११७।१। प्रजापतेस्त्रयस्त्रिंशत् सम्मितम् । प्रजापतिर्विराडिन्द्रः॥

एऽ३१।(चतुः)। प्रवोमहाइ। महेवृधाइभराऽ२३४ध्वाम्। क्षौ।(चतुः)। एऽ३१।(चतुः)। प्रचेतसाइ। प्रसुमताइङ्कृणूऽ२३४ध्वाम्। क्षौ।(चतुः)। एऽ३१।(चतुः)। विशः पूर्वाइः। प्रचरचर्षणाऽ२३४इप्राः। क्षौ।(चतुः)। एऽ३१।(द्विः)। एऽ३१२। आऽ२३४। औहोवा॥ ए। व्रतमेसुवरेशकुनः॥

(दी॰ ९ । प॰ ३७ । मा॰ ११ ) १३ (थ । १९९)

११८।१। प्रजापतेश्चतुस्त्रिंशत् सम्मितम् । प्रजापतिस्त्रिष्टुबिन्द्रः॥

एऽ२।(पञ्चकृत्वः)। योवा।(पञ्चकृत्वः)। योवाहाइ।(पञ्चकृत्वः)। इन्द्रन्नरो। नेऽ३मधि। ताहवन्ताइ। एऽ२।(पञ्चकृत्वः)। योवा।(पञ्चकृत्वः)। योवाहाइ।(चतुः)। योवाऽ३हाउ। वा। क्षौ।(त्रिः)। एऽ२।(पञ्चकृत्वः)। योवा।(पञ्चकृत्वः)। योवाहाइ।(पञ्चकृत्वः)। यत्पारियाः। युनज। ताइधियस्ताः। एऽ२।(पञ्चकृत्वः)। योवा।(पञ्चकृत्वः)। योवा हाइ।(चतुः)। योवाऽ३हाउ। वा। क्षौ।(त्रिः)। एऽ२।(पञ्चकृत्वः)। योवा।(पञ्चकृत्वः)। योवाहाइ।(पञ्चकृत्वः)। शूरोनृषा। ताऽ३श्रव। सश्चकामाइ। एऽ२।(पञ्चकृत्वः)। योवा।(पञ्चकृत्वः)। योवाहाइ।(चतुः)। योवाऽ३हाउ। वा। क्षौ।(त्रिः)। एऽ२। (पञ्चकृत्वः)। योवा।(पञ्चकृत्वः)। योवाहाइ।(पञ्चकृत्वः)। आगोमताइ। व्रजेभ। जातुवन्नाः।

एऽ२।(पञ्चकृत्वः)। योवा।(पञ्चकृत्वः)। योवाहाइ।(चतुः)। योवाऽ३हाउ। वा॥ ए।
व्रतमेसुवरेशकुनः॥

(दी॰ २०४ । प॰ १४७ । मा॰ ४८ ) १४ (थै । २००)

११९।१। जमदग्नेर्व्रतम् । जमदग्निर्बृहतीन्द्रः॥

हाउहाउहाउ। हहाउ।(त्रिः)। हहहाउ।(त्रिः)। कपाऽ२३उ।(त्रिः)। हाऽ३ओऽ२३।(द्विः)।
हाऽ३१उवाऽ२। अभित्वाशूरनोऽ३। आउ। वाऽ२३। नूऽ२३४माः। ईडा।(त्रिः)।
ज्योतिष्पतस्स्वᳶपतान्तरिक्षंपृथिवींपश्चप्रदिशश्चऋषीन्देवान्वर्णम्॥ अदुग्धाइवधाऽ३१उवाऽ२३इ।
नाऽ२३४वाः। ईडा।(त्रिः)। ज्योतिष्पतस्स्वऽपतान्तरिक्षंपृथिवींपश्चप्रदिशश्चऋषीन्देवान्वर्णम्॥
ईशान मस्यजगतस्सुवाऽ३१उवाऽ२३। दृऽ२३४शाम्। ईडा।(त्रिः)।
ज्योतिष्पतस्स्वᳶपतान्तरिक्षंपृथिवींपश्चप्रदिशश्चऋषीन्देवान्वर्णम्॥ ईशानमिन्द्रताऽ३१उवाऽ२३।
स्थूऽ२३४षाः। ईडा।(त्रिः)। ज्योतिष्पतस्स्वᳶपतान्तरिक्षं पृथिवींपश्चप्रदिशश्चऋषीन्देवान्वर्णम्॥
हाउहाउहाउ। हहाउ।(त्रिः)। हहहाउ। (त्रिः)। कपाऽ२३उ।(त्रिः)। हाऽ३ओऽ२३।(द्विः)।
हाऽ३१उवाऽ२॥ ए। व्रतमेसुवरेशकुनः॥

(दी॰ ६४ । प॰ ५४ । मा॰ ४९ ) १५ (धो । २०१)

१२०।१। युग्यञ्च दशस्तोभम् । जमदग्निस्त्रिष्टुबिन्द्रः॥

हाउहाउहाउ। ओहा।(त्रिः)। हाओवा।(त्रिः)। ऊऽ२।(त्रिः)। ओऽ२। (त्रिः)। हाउवाक्।(त्रिः)।

आयुर्यन्।(त्रिः)। एआयुः।(त्रिः)। आयुः।(त्रिः)। वयाः।(द्विः)। वयः।

इन्द्रन्नरोनेमधिताहवाऽ२न्ताइ॥ यत्पार्यायुनजते धियाऽ२स्ताः॥ शूरोनृषाताश्रवसश्चकाऽ२माइ॥

आगोमतिव्रजेभजातुवाऽ२ न्नाः। हाउहाउहाउ। ओहा।(त्रिः)। हाओवा।(त्रिः)। ऊऽ२।(त्रिः)।

ओऽ२। (त्रिः)। हाउवाक्।(त्रिः)। आयुर्यन्।(त्रिः)। एआयुः।(त्रिः)। आयुः।(त्रिः)।

वयाः।(द्विः)। वाऽ२। याऽ२३४। औहोवा॥ ए। आयुर्द्धाअस्मभ्यंवर्चोधादेवेभ्याऽ२३४५:॥

(दी० ९५ । प० ६४ । मा० ५९ ) १६ (भो । २०२)

१२१।१। वार्त्रघ्नम्। इन्द्रस्त्रिष्टुबिन्द्रः॥

वृत्रहत्यायहोइ।(त्रिः)। अधृष्णवेहोइ।(त्रिः)। अपूरवेहोइ।(द्विः)। अपूरावाऽ२इ।

पृथिवीश्चाहोइ।(त्रिः)। विवर्त्तयाहोइ।(द्विः)। विवर्त्तायाऽ२। अन्तरिक्षꣳहोइ।(त्रिः)।

सुधारयाहोइ।(द्विः)। सुधारायाऽ२। दिवंवेपाहोइ। (त्रिः)। अवेपयोहोइ।(द्विः)। अवेपायाऽ२:।

होइ।(द्विः)। हुवेऽ२। हाऽ३१उवाऽ२। इन्द्रऽ२।(द्विः)। इन्द्र। स्यनू।(द्विः)। स्यनूऽ३।

आउ। वाऽ२। वीर्याणि। प्रवा।(द्विः)। प्रवाऽ३१उ। वाऽ२३। चाऽ२३४५म्। यानिऽ२।

(द्विः)। यानि। चका।(द्विः)। चकाऽ३१उ। वाऽ२। रप्रथमा। निवा।(द्विः)। निवाऽ३१उ।

वाऽ२३। ज्रीऽ२३४५। अहऽ२न्।(द्विः)। अहन्। अहाइम्। (द्विः)। अहाऽ३१उ।

वाऽ२। अन्वपः। तता।(द्विः)। तताऽ३१उ। वाऽ२३। दाऽ२३४५। प्रवऽ२।(द्विः)।
प्रव। क्षणाः।(द्विः)। क्षणाऽ३१उ। वाऽ२। अभिनत्पा। वेता।(द्विः)। वेताऽ३१उ।
वाऽ२३। नाऽ२३४५म्। वृत्रहत्यायहोइ।(त्रिः)। अधृष्णवेहोइ।(त्रिः)। अपूरवेहोइ।(द्विः)।
अपूरावाऽ२इ। पृथिवीश्चाहोइ।(त्रिः)। विवर्त्तयाहोइ।(द्विः)। विवर्त्तायाऽ२। अन्तरिक्षꣳहोइ।(त्रिः)।
सुधारयाहोइ।(द्विः)। सुधारायाऽ२। दिवंवेपाहोइ।(त्रिः)। अवेपयोहोइ।(द्विः)। अवेपायाऽ२ः।
होइ।(द्विः)। हुवेऽ२। हाऽ३१उवाऽ२। ए। वृत्रहासपत्नहा।(द्वे त्रिः)॥

(दी° ८५ । प° १२१ । मा° ७६) १७ (पू । २०३)

१२२।१। प्रजापतेश्चाष्टानिधनम् । अभिप्रघ्ना। तमोजसा। तमोजासाऽ२।(त्रीणि त्रिः)।
तमोजसा। सुवोजासाऽ२।(द्वे द्विः)। तमोजसा। सुवो। जाऽ२। साऽ२३४। औहोवा।
असिप्राणएअसि।(त्रिः)। एअसि।(त्रिः)। सत्यमित्थावृषाऽ२इदाऽ२३४सी। एअसि।(द्विः)।
ए। आऽ२। साऽ२३४। औहोवा। इडाङ्गच्छसूर्यङ्गच्छे। डाङ्गच्छसूर्यङ्गच्छे। डाङ्गच्छसूर्यङ्गच्छ।
अभिप्रघ्ना। तमोजसा। तमोजासाऽ२।(त्रीणि त्रिः)। तमोजसा। सुवोजासाऽ२।(द्वे-
द्विः)। तमोजसा। सुवो। जाऽ२। साऽ२३४। औहोवा। असिचक्षुरेअसि।(त्रिः)।
एअसि।(त्रिः)। वृषजूतिर्नोऽ२वाऽ२३४इता। एविता।(द्विः)। ए। वाऽ२इ। ताऽ२३४।
औहोवा। अन्तरिक्षंगच्छनाकेविभाहि।(त्रिः)। अभिप्रघ्ना। तमोजसा। तमोजासाऽ२।(त्रीणि
त्रिः)। तमोजसा। सुवोजासाऽ२।(द्वे द्विः)। तमोजसा। सुवो। जाऽ२। साऽ२३४।
औहोवा। असिश्रोत्रमेअसि।(त्रिः)। एअसि। (त्रिः)। वृषाह्युग्रश्शृण्विषेपराऽ२वाऽ२३४ती।

एवति।(द्विः)। ए। वाऽ२। ताऽ२३४। औहोवा। स्वर्गच्छज्योतिर्गच्छ।(त्रिः)। अभिप्रघ्रा।
तमोजसा। तमोजासाऽ२।(त्रीणि त्रिः)। तमोजसा। सुवोजासाऽ२।(द्वे द्विः)। तमोजसा।
सुवो। जाऽ२। साऽ२३४। औहोवा। असिज्योतिरेअसि।(त्रिः)। एअसि। (त्रिः)।
वृषोअर्वावताऽ२इश्रूऽ२३४ताः। एश्रुतः।(द्विः) ए। श्रूऽ२। ताऽ२३४। औहोवा।
अतिज्योतिर्विभाह्येअति।(द्विः)। अतिज्योतिर्विभाह्येअतीऽ२३४५॥.

(दी° १४६ । प° १३६ । मा° ४० ) १८ (कौ । २०४)

१२३।१। इन्द्रस्य राजनम् रोहिणे द्वे, (राजनम्) । इन्द्रस्त्रिष्टुबिन्द्रः॥

हिम्।(त्रिः)। हो।(त्रिः)। ह९।(त्रिः)। ओहा।(त्रिः)। औहोइ।(त्रिः)। इन्द्रन्नरो। नेऽ३मधि।
ताहवन्तइ । (त्रीणि त्रिः) । वयोबृहत् । (त्रिः) । विभ्राष्टयेविधर्मणे। (त्रिः) ॥
यत्पारियाः । युनज । ताइधियस्थाः । (त्रीणि त्रिः) । सत्यमोजः । (त्रिः)।
रजस्सुवः । (त्रिः) ॥ शूरोनृषा । ताऽ३श्रव । सश्चकामाइ । (त्रीणि त्रिः)।
भद्र९सुधे । षमूर्जम् । इषमूर्जम् । (द्विः) ॥ आगोमताइ । व्रजेभ । जातुवन्नः।
(त्रीणी त्रिः) । बृहद्दाशः ।(त्रिः) । दिविदधेऽ३हस् । (द्विः) । दिविदधेऽ३। हाउवा॥
वागीडावोसूबृहद्भ्राऽ२३४५: ॥

(दी° ६६ । प° ७७ । मा° ४३ ) १९ (खू । २०५)

१२३।२। रौहिणम् । इन्द्रस्त्रिष्टुबिन्द्रः।

हाउहाउहाउ। आइही।(त्रिः)। आइहिया।(त्रिः)। आसाउ।(त्रिः)। आयाम्।(त्रिः)। नामाः।(त्रिः)। किट्।(द्विः)। इन्द्रन्नरोनेमधिताहवाऽ२न्ताइ॥ यत्पार्यायुनजतेधियाऽ२स्ताः॥ शूरोनृषाताश्रवसश्चकाऽ२माइ॥ आगोमतिव्रजेभजातुवाऽ२न्नाः। मनाऽ२३होइ। प्राणाऽ२३होइ। चक्षूऽ२३ होंइ। श्रोत्राऽ२३ ४होइ। घोषाऽ२३होइ। व्रताऽ२३ ४होइ। भूताऽ२३ ४होइ। पानाऽ२३ ४होइ। चित्ताऽ२३ ४होइ। धीताऽ२३ ४होइ। सुवाऽ२३होंइ। ज्योताऽ२३इहोंऽ२। वाऽ२३४औहोवा॥ ऊऽ२३४५॥

(दी० २६ । प० ३६ । मा० ३७ ) २० (कें । २०६)

॥ दश चतुर्थः खण्डः ॥ ४ ॥

॥ इति (ग्रामे) आरण्यकगाने चतुर्थः प्रपाठकः ॥ ४ ॥

---

## ॥ अथ पञ्चमप्रपाठके प्रथमोऽर्द्धः ॥

### ॥ अथ पञ्चमः खण्डः ॥

१। अग्नेरिलान्दं पश्चानुगानम्, इरान्नं वा । अग्न्यनुष्टुबात्मा॥

हाउहाउहाउ। ऊऽ२।(त्रिः)। हुऊऽ२।(त्रिः)॥ इयाहाउ।(द्विः)। इयाऽ३हाउ। वाऽ३॥
इट्(स्थि)इडाऽ२३४५॥

(दी० ३ । प० १२ । मा० १० ) १ (ठौ । २०७)

१२४।१।अग्नेरिलांसं पश्चानुगानम् । अग्निस्त्रिषाटुबग्निः (अग्निः वा) । (तत्र द्वितीयमिदम्)॥

हाउहाउहाउवा। अग्निरस्मिजन्मनाजातवेदाः। इडा। सुवः। इडा॥ हाउहाउहाउवा।
घृतंमेचक्षुरमृतंमआसन्। इडा। सुवः। इडा॥ हाउहाउ हाउवा॥ त्रिधातुरर्क्कोरजसोविमानः।
इडा। सुवः। इडा॥ हाउहाउहाउवा। अजस्रंज्योतिर्हविरस्मिसर्वम्। इडा। सुवः।
इडा॥

(दी० १९ । प० २० । मा० २१ ) २ ( न । २०८)

१२५।१। अग्नेरिलांसं पञ्चानुगानम् । अग्निस्त्रिषाटुबग्निः (तत्र तृतीयमिदम्) ॥

हाउहाउहाउ। पात्यग्निर्विपोअग्रंपदंवेः। हाऽ३१उवाऽ२३। सूऽ२३४वाः। इह। हाऽ३१उवाऽ२३। ज्योऽ२३४तीः॥ हाउहाउहाउ। पातियह्वश्चरण१ंसूरियास्या। हाऽ३१उवाऽ२३। सूऽ२३४वाः। इह। हाऽ३१उवाऽ२३। ज्योऽ२३४तीः॥ हाउहाउहाउ। पातिनाभासप्तशीर्षाणमाग्निः। हाऽ३१उवाऽ२३। सूऽ२३४वाः। इह। हाऽ३१उवाऽ२३। ज्योऽ२३४तीः॥ हाउहाउहाउ। पातिदेवानामुपमादमार्ष्वः। हाऽ३१उवाऽ२३। सूऽ२३४वाः। इह। हाऽ३१उवाऽ२३। ज्योऽ२३४तीः॥

(दी० २८ । प० २८ । मा० ३२ ) ३ (डा । २०९)

❁ अस्य मूलं न ऋक् अपि तु स्तोभः स चैषः - हु- ॥

१२७।१। अग्नेरिलांसं पञ्चानुगानम् । (तत्र चतुर्थमिदम्) ॥

इयाऽ२।(त्रिः)। इयाहाउ।(त्रिः)। इन्द्रन्नरो। नेऽ३मधि। ताहवन्ताइ। हवन्तेऽ३। ह१ंह१ंह१ंह१ंह१ं ।(द्वे त्रिः)॥ हवन्ते।(त्रिः)। यत्पा रियाः। युनज। ताइधियस्ताः। धियस्ताऽ३ः। ह१ंह१ंह१ंह१ंह१ं ।(द्वे त्रिः)। धियस्ताः।(त्रिः)। शूरोनृषा। ताऽ३श्रव। सश्वकामाइ। चकामेऽ३। ह१ंह१ंह१ंह१ंह१ं।(द्वे त्रिः)। चकामे।(त्रिः)॥ आगोमताइ। व्रजेभ। जातुवन्नाः। तुवन्नाऽ३ः। ह१ंह१ंह१ंह१ंह१ं।(द्वे त्रिः)। तुवन्नः।(त्रिः)। इयाऽ२।(त्रिः)। इयाहाउ।(द्विः)। इयाऽ३हाउ। वा॥ ए। व्रतमेसुवरेशकुनः॥

(दी° ५१ । प° ६३ । मा° २६ ) ४ (गू । २१०)

१२७।१। अग्निः पंक्तिरिन्द्रः॥

भ्राजाऔहोहोहाइ। त्यग्नेसमिधानादीऽ१दिवाऽ२:॥ जिह्वाऔहोहोहाइ।
चरत्यन्ताराऽ१सानीऽ२॥ सत्वाऔहोहोहाइ। नोअग्नेपयसावसूऽ३वीत्॥
रयिंवर्चोदृशौहोऽ३। हिम्माऽ२। दा। औऽ३होवा। होऽ५इ॥ डा॥

(दी° १३ । प° १२ । मा° १० ) ५ (ठौ । २११)

❀ एतेषां षष्ठादि त्रयाणां मूलानि न ऋचः अपि तु स्तोभाः |

अधिपते । अधि । पते । मित्रपते । मित्र । पते । क्षत्रपते । क्षत्र ।
पते । स्व:पते । स्वाऽ३रिति । पते । धनपते धन । पते । नमः ।
मन्युना । वृत्रहा । वृत्र । हा । सूर्येण । स्वराट् । स्व । राट् । यज्ञेन ।
मघवा । दक्षिणा । अस्य । प्रिया । तनूः । राज्ञा । विशम् । दाधर ।
वृषभः । त्वष्टा । वृत्र्ण । शचीपतिः । शची । पतिः । अन्नेन । गयः ।
पृथिव्या । सृणिकः । अग्निना । विश्वम् । भूतम् । अभि । अभवः ।
वायुना । विश्वा । प्रजाः । प्र२ । जाः । अभि । अपवथाः । वषट्कारेण ।
वषट् । कारेण । अर्द्धभाक् । अर्द्ध । भाक् । सोमेन । सोमपाः । सोम ।
पाः । समित्या ।सम् । इत्या । परमेष्ठी । परमे । स्थी । ये । देवाः ।
देवाः । दिविषदः । दिवि । सदः । अन्तरिक्षसदः । अन्तरिक्ष । सदः ।
पृथिवीषदः । पृथिवी । सदः । अप्सुषदः । अप्सुषदः । अप्सु । सदः ।
दिक्षुसदः । दिक्षु । सदः । आशासदः । आशा । सदः । स्थ । तेभ्यः ।
वः । देवाः । देवेभः । नमः । अव । ज्याम्। इव । धन्वनः । वि ।

ते । मन्युम् । नयांआषी । मृडताम् । नः । इह । अस्मभ्यम् । यः । इदं ।

विश्वम् । भूतं । युया । नमः । उत्ततिभ्यः । उत् । ततिभ्यः ।

च । उत्तन्वानेभ्यः । उत् । तन्वानेभ्यः । च । नमः । नीषङ्गिभ्यः ।

नी । सङ्गिभ्यः ।च । उपवीतिभ्यः । उप । वीतिभ्यः । च । नमः ।

अस्मद्भ्यः । च । । प्रतिदधानेभ्यः । प्रति । दधानेभ्यः । च । नमः ।

प्रविध्यद्भ्यः । । च । । प्रव्याधिभ्यः । प्र । व्याधिभ्यः । च । नमः । त्सरभ्यः ।

च । त्सरिभ्यः । च । नमः । श्रितेभ्यः । च । श्रायिभ्यः । च । नमः ।

तिष्ठद्भ्यः । च । उपतिष्ठद्भ्यः । उप । तिष्ठद्भ्यः । च। नमः ।यते । च ।

वियते । वि । यते । च । मः ।पथे । च । विपथाय । वि । पथाय । च ॥ ७ ॥

नमः । अन्नाय । नमः । अन्नपतये । अन्न । पतये । एकाक्षाय । एक । अक्षाय । च ।

अवपन्नादाय । अव । पन्नादाय । च । नमः । नमः । रुद्राय । तीरसदे ।

तीर । सदे । नमः । स्थिराय ।स्थिरधन्वने । स्थिर । धन्वने ।

नमः ।प्रतिपदाय । प्रति । पदाय । च । पटरिणे । च । नमः । त्र्यम्बकाय । त्रि । अम्बकाय ।

च । कपर्द्दिने । च । नमः ।आश्रयेभ्यः । च । प्रत्याश्रायेभ्य२ः । प्रति ।

आश्रयेभ्यः । च । नमः । संवृते । सम् । वृते । च विवृते । वि वृते । च ॥

(स्तोभपदपाठः २-५)

१।देवव्रतानि त्रीणि (रौद्रे पूर्वे, वैश्वदेवं तृतीयम्, वैश्वदेवे वा पूर्वे, रौद्रं तृतीयम्)।

द्वयो रुद्रोऽनुष्टुप् रुद्रः। तृतीयस्य विश्वेदेवा अनुष्टुबिन्द्रः रुद्रः॥

अधिप। ताइ। मित्रप। ताइ। क्षत्रप। ताइ। स्वःपताइ। धनपताऽ२इ। नाऽ२माः॥

मन्युनावृत्रहासूर्येणस्वराड्यज्ञेनमघवादक्षिणास्यप्रियातनूराज्ञाविशंदाधार।

१ र २ुर २ र १ २१र२१ २ १र २१र र २र१
वृषभस्त्वष्टावृत्रेणशचीपतिरन्नेनगयऽपृथिव्यासृणिकोग्निनाविश्वंभूतम।

२ र र १ र र २१र २ र २र र २१र र र २ र १र २र र१र
भ्यभवोवायुनाविश्वाऽप्रजाअभ्यपवथावषट्कारेणार्द्धभाक्सोमेनसोमपास्समित्यापरमेष्ठी।

र र२रर र १ २ १ र र२रर र २ुर २र १ २ १र र२रर र १ २
येदेवादेवा:। दिविषद:। स्थतेभ्योवोदेवादेवेभ्योनम:। येदेवादेवा:। अन्तरिक्षसद:।

१ र र२रर र र १र २र १ २ १र र२रर र र १ २ १ र र२रर र २ुर २र १ २
स्थतेभ्योवोदेवादे वेभ्योनम:। येदेवादेवा:। पृथिवीषद:। स्थतेभ्योवोदेवादेवेभ्योनम:।

१र र२र र र १ २ १ र र२रर र २ुर २र १ २ १र र२रर र १ २
येदेवा देवा:। अप्सुषद:। स्थतेभ्योवोदेवादेवेभ्योनम:। येदेवादेवा:। दिक्षुसद:।

१ र र२रर र २ुर २र १ २ १र र२रर र र र १ २ १ र र२रर र र १र २र १ २
स्थतेभ्योवोदेवादेवेभ्योनम:। येदेवादेवा:। आशासद:। स्थतेभ्योवोदेवादे वेभ्योनम:।

१ २ १र २ १ २र १र २ १ २र १ र २ १ २ १ २ १ २
अवज्यामिवधन्वनोवितेमन्युन्नयामसिमृडतान्नइह॥ अस्मभ्यम्। इडाऽ२३भा॥

१ र २ १ ५
यइदंविश्वंभूतम्। युयोऽ३आउ। वाऽ२३॥ नाऽ२३४मा:॥

(दी° १२६ । प° ३७ । मा° ३२ ) ६ (खा । २१२)

२।

१ २ १ २ १ २ १ २ १ २ १
अधिप। ताइ। मित्रप। ताइ। क्षत्रप। ताइ। स्वःपताइ। धनपताऽ२इ। नाऽ२मा:॥

२ १ २र २ुर २ १ र२र १ २र र १ २ १ र २
नमउत्ततिभ्यश्चोत्तन्वानेभ्यश्चनमोनीषंगिभ्यश्चो पवीतिभ्यश्चनमोस्यद्भ्यश्चप्र।

१ २ुर १ २ १ २ र १ २ १ २ १ २ र १ २ १ २
तिदधानेभ्यश्चनमऽप्रविध्यद्भ्यश्चप्रव्याधिभ्यश्चनम:त्सरद्भ्यश्चत्सारिभ्यश्चनमश्श्रि।

१र २ र १ २ १ २ १ २ र १ २ १ र २ुर २ १र २ १ २ुर २ १ २र
तेभ्यश्चश्रायिभ्यश्चनमस्तिष्ठद्भ्यश्चोपतिष्ठद्भ्यश्चनमोयतेचवियतेचनमऽपथेचविपथायच।

१ २ १र २ १ २र १र २ १ २र १ र २ १ २ १ २ १ २
अवज्यामिवधन्वनोवितेमन्युन्नयामसिमृडतान्नइह॥ अस्मभ्यम्। इडाऽ२३भा॥

१ र २ १ ५
यइदंविश्वंभूतम्। युयोऽ३आउ। वाऽ२३॥ नाऽ२३४मा:॥

(दी० २६ । प० १९ । मा० १५ ) ७ (घु । २१३)

३।

अधिप। ताइ। मित्रप। ताइ। क्षत्रप। ताइ। स्वःपताइ। धनपताऽ२इ। नाऽ२माः।
मोन्नायनमोन्नपतयएकाक्षायचावपन्नादायचनमोनमः।
रुद्रायतीरसदेनमस्स्थिरायस्थिरधन्वनेनमꣳप्रतिपदायचपटरिणेचनमस्त्रियम्बकायचक।
पर्दिनेचनमआश्रायेभ्यश्चप्रत्याश्रायेभ्यश्चनमꣳक्रव्येभ्यश्चविरिम्फेभ्यश्चनमस्संवृतेचविवृतेच।
अवज्यामिवधन्वनोवितेमन्युन्नयामसिमृडतान्नइह॥ अस्मभ्यम्। इडाऽ२३भा॥
यइदंविश्वंभूतम्। युयोऽ३आउ। वाऽ२३॥ नाऽ२३४माः॥

(दी० ३५ । प० १९ । मा० १६ ) ८ (भू । २१४)

१२८।१। ऋतुष्ठायज्ञायज्ञीयम् । प्रजापतिर्बृहत्यृतवः

वाऽ५सन्तः। ईऽ३न्नूऽ३रन्तायाः॥ ग्रीष्मइन्नुराऽ१न्तीऽ३याः। वर्षाण्यनुशाऽ३। हिम्॥
राऽ३दाः॥ हेमन्तश्शिशिरइन्नुराऽ२न्तियाउ॥ वाऽ३४५॥

(दी० ३ । प० ८ । मा० ८ ) ९ (डै । २१५)

१२९।१। अजितस्य जितिसाम । अजितो बृहतीन्द्रः प्रजापतिर्बृहतीशानौ ॥

हाउहाउहाउ। हुप्।(त्रिः)। बिबिबिबिबीऽ३।(त्रिः)। हीऽ२।(त्रिः)। हाउहाउहाउवा।
अभित्वाशूरनोनुमोहस्॥ अदुग्धाइवधेनवोहस्। ईशा नमस्यजगतस्स्वर्दृशꣳहस्।

ईशानमिन्द्रतस्थुषोहस्। हाउहाउहाउ। हुप्। (त्रिः)। बिबिबिबिबिबीऽ३।(त्रिः)। हीऽ२।(त्रिः)।
हाउहाउहाउवा॥ एअस्। एफट्। एमृस्। एहस्। ईऽ२३४५॥

(दी॰ २२ । प॰ ३१ । मा॰ २८ ) १० (त्रै । २१६)

१३०।१। सोम व्रतम्। सोमस्त्रिष्टुप्सोमः॥

ईऽ२।(त्रिः)। सन्तेपया। सीऽ३समु। यन्तुवाजाः॥ संवृष्णिया। नीऽ३अभि। मातिषाहाः॥
आप्यायमा। नोऽ३अमृ। तायसोमा॥ दिविश्रवा। सीऽ३उत्त। मानिधिष्वा। ईऽ२।(द्विः)।
ईऽ२। आऽ२३४औहोवा॥ हू॥

(दी॰ ११ । प॰ २० । मा॰ ६ ) ११ (ङू । २१७)

१३१।१। दीर्घतमसोऽर्कः । दीर्घतमास्त्रिष्टुप्सोमः सूर्यो वा॥

आयाउ।(त्रिः)। अक्रान्त्समूद्रः प्रथमाइविधर्मान्। विधर्मान्।(द्विः)।आआयाउ । (त्रिः)।
अक्रान्त्समूद्रःप्रथमाइ विधर्मान् । (द्विः) । जनयन्प्राजाभुवनास्यगोपाः। स्यगोपाः।
(द्विः) ।वृषापावित्रेअथिसानोअव्याइ । नोअव्याइ । (द्विः) । आयाउ । (त्रिः) ।
बृहत्सोमोवृधेसुवनोअद्राइ । नोअद्राइ । नोअद्राऽ३१उवाऽ२३ ॥ एऽ३।
धेस्वानोअद्रीऽ२३४५:॥

(दी॰ २० । प॰ २० । मा॰ २८ ) १२ ( मै । २१८)

## ॥ द्वादशः पञ्चमः खण्डः ॥ ५ ॥

## ॥ अथ षष्ठः खण्डः ॥

१३२।१। पुरुषव्रतानि पञ्च । पुरुषोऽनुष्टुप्पुरुषः॥

उहुवाहाउ।(त्रिः)। सहस्रशीर्षाःपुरूऽ२३षाः॥ सहस्राक्षस्सहस्राऽ२३पात्॥

सभूमिꣳसर्वतोवाऽ२३त्वा॥ अत्यतिष्ठद्दशाङ्गूऽ२३लाम्। उहुवाहाउ। (द्विः)। उहुवाऽ३हाउ।

वाऽ३॥ इट्(स्थि)इडाऽ२३४५॥

(दी० ६ । प० १२ । मा० १० ) १३ (खौ । २१९)

१३३।१।

उहुवौहोवाऽ२।(त्रिः)। त्रिपादूर्ध्वउदैत्पुरूऽ२३षाः॥ पादोस्येहाभवत्पूऽ२३नाः॥

तथाविष्वङ्व्यक्राऽ२३मात्॥ अशनानशनेआऽ२३भी। उहुवौहोवाऽ२।(द्विः)।

उहुवौ। होऽ२। वाऽ२३४। औहोवा। ईऽ२३४डा। उहुवौहोवाऽ२।(द्विः)।

उहुवौ। होऽ२। वाऽ२३४। औहोवा। सूऽ२३४वाः। उहुवौहोवाऽ२।(द्विः)।

उहुवौ। होऽ२। वाऽ२३४। औहोवा॥ ऊऽ२३४५॥

(दी० ३७ । प० २८ । मा० ६ ) १४ (जू । २२०)

१३४।१।

इयौहोवाऽ२।(त्रिः)। पुरुषएवेद॒सा॒ऽ२३र्वाम्॥ यद्भूतंयच्चभावाऽ२३याम्॥
पादोस्यसर्वाभूताऽ२३नी॥ त्रिपादस्यामृतंदाऽ२३इवी। इयौहोवाऽ२। (द्विः)।
इयौ। होऽ२। वाऽ२३४। औहोवा। ईऽ२३४डा। इयौहोवाऽ२।(द्विः)।
इयौ। होऽ२। वाऽ२३४। औहोवा। ज्योऽ२३४तीः। इयौहोवाऽ२।(द्विः)।
इयौ। होऽ२। वाऽ२३४। औहोवा॥ ईऽ२३४५॥

(दी० ३७ । प० २८ । मा० ५ ) १५ (ज्रु । २२१)

१३५।१।

हाउहाउहाउ। तावानस्य। महाऽ२३इमाऽ३॥ हाउहाउहाउ।
ततोज्याया॒श्चपूरूऽ२३षाऽ३ः॥ हाउहाउहाउ। उतामृतत्वस्येशाऽ२३नाऽ३ः॥ हाउहाउहाउ।
यदन्नेनातिरोहाऽ२३तीऽ३। हाउहाउहाउ। वाऽ३॥ इट्(स्थि) इडाऽ२३४५॥

(दी० २३ । प० १२ । मा० १९ ) १६ ( ठो । २२२)

१३६।१।

हाउहाउहाउवा। ततोविराडजायत॥ हाउहाउहाउवा। विराजोअधि पूरुषः॥ हाउहाउहाउवा।
सजातोअत्यरिच्यत॥ हाउहाउहाउवा। पश्चाद्भूमिमथोपुरः। हाउहाउहाउवाऽ३॥ ईऽ२३४५॥

(दी० ११ । प० १० । मा० १९ ) १७ (ड्रो । २२३)

१३७।१। पुरषव्रते द्वे, पश्चानुगानश्चैकानुगानश्च । पुरुषो गायत्रीश्वपुरुषः, विश्वेदेवाः वा । (तत्रेदं द्वितीयमेकानुगानम्) ॥

हाउहाउहाउ। अस्मीनस्मिन्।(त्रिः)। नृम्णाइनृम्णम्।(त्रिः)। निधाइमाहे।(त्रिः)।
कयानश्चित्रऽ३आभूऽ१वाऽ२त्॥ ऊतीसदावृऽ३धास्साऽ१खाऽ२॥
कयाशचिष्ठऽ३यावाऽ१र्ताऽ२३॥ हाउहाउहाउ। अस्मीनस्मिन्। (त्रिः)। नृम्णाइनृम्णम्।(त्रिः)।
निधाइमाहे।(द्विः)। निधाऽ२३इ। माऽ२। हाऽ२३४। औहोवा॥ सुवर्ज्योतीऽ२३४५:॥

(दी॰ १४ । प॰ २७ । मा॰ ३३ ) १८ (थि । २२४)

१३८।१। द्यावापृथिव्योः (द्यौर्व्रतम्) । द्यौः ज्योतिष्मती जगती द्यावापृथिव्यौ॥

हुवाइ।(त्रिः)। रूपम्। मन्येवांद्यावापृथिवीसुऽ३भोजाऽ१साऽ२उ॥
येअप्रथेथाममितमाभिऽ३योजाऽ१नाऽ२म् । द्यावापृथिवीभवऽ३ताऽ२स्योऽ१नाऽ२इ ॥
तेनोमुञ्चतऽ३माऽ२हाऽ१साऽ२: । हुवाइ । (त्रिः) । रूपाऽ२ । वाऽ२३४औहोवा ॥
ए । रूपम् । (द्वे त्रिः) ॥

(दी॰ २३ । प॰ १९ । मा॰ १६ ) १९ (दू । २२५)

१३७।१। त्रीणि लोकानां व्रतानि दिवोऽन्तरिक्षस्य पृथिव्याः । अन्तरिक्षं गायत्रीन्द्रः।

(तत्रेदं द्वितीयमन्तरिक्षस्य व्रतमिति)॥

१ २र १ २ र १ २ र र र १ २
वाक्।(द्विः)। वागीयम्। कयानश्चित्रऽ३आभूऽ१वाऽ२त्। ऊतीसदावृऽ३धास्साऽ१खाऽ२।
र १ २ १ २र १ ^ ३ ५र र २र
कयाशचिष्ठऽ३यावाऽ१र्ताऽ२। वाक्।(द्विः)। वागीयाऽ२। वाऽ२३४औहोवा। ए।
१ २र १ र २र ३ १ १ १
अन्तरिक्षेसलिलल्लेलायाऽ२३४५॥

(दी० १३ । प० १२ । मा० ८ ) २० (ठै । २२६)

१३८।१। विपरीते द्वे, तत्र द्वितीयमिदं पृथिवीव्रतम् । पृथिवीज्योतिष्मती जगती द्यावापृथिव्यौ॥

२ १र २ १ २ र र र र र र र र र र र र र
प्रतिष्ठासिप्रति। ष्ठा।(द्वे त्रिः)। वर्चोसिमनोसिऐही। मन्येवांद्यावापृथिवीसुभोजसावेही॥
र र र र र र र र र र र र र र र र र
येअप्रथेथाममितमभियोजनामैही। द्यावापृथिवीभवत२स्योनाऐही॥ तेनोमुञ्चतम२हसाऐही।
१र २ १ २ र र र २ र र १
प्रतिष्ठासिप्रति। ष्ठा। (द्वे त्रिः)। वर्चोसिमनोसिऐहीऽ३। हाउवा॥ ए। भूतम्।(द्वे त्रिः)॥

(दी० ४७ । प० २५ । मा० ९ ) २१ (ञो । २२७)

१३९।१। ऋश्यसाम व्रतम् । कश्यपोऽनुष्टुबिन्द्रः॥

२ र १ २ १र र २ २ २ १र २^ ४ ५
हरीतइन्द्रश्मश्रूणी। उतोतेहरिताऽ१उहाऽ३री॥ तन्त्वास्तुवन्तिकाऽ३। वाया:॥
२ १र र २^ ४ ५
परुषासोवनाऽ३। गावा:॥
१ र २ १ २ १ २ १ २ १ र २र ३ १ १ १
ऋश्यासइन्द्रभुङ्क्तितिमघवन्निन्द्रभुङ्क्तितिभुङ्क्तितिप्रभुङ्क्तितीन्द्रस्तसरपूताऽ२३४५:॥

(दी० ९ । प० ७ । मा० ६ ) २२ (थू । २२८)

## ॥ दश षष्ठः खण्डः ॥ ६ ॥

## ॥ इति (ग्रामे) आरण्यकगाने पञमस्यार्द्धः प्रपाठकः ॥

## ॥ अथ पञ्चमप्रपाठके द्वितीयोऽर्द्धः ॥

## ॥ अथ सप्तमः खण्डः ॥

१४०।१। दिशां व्रतम् दशानुगानम् । दिशोऽनुष्टुप् आत्मा। (कश्यपगायत्रीन्द्रः)॥

२र र र १ २ १ २र१र २र१र २र१र २र १र
हाउहाउहाउ। अहमन्नम्।(त्रिः)। अहमन्नादो। हमन्नादो। हमन्नादो। हंविधारयो।(द्विः)।

२र १ २र र र १ २र १ २ १ २र १२र १ र २ १ २ १ २ १ २र १
